श्रीमते रामनन्दाय नमः ।

श्रीरामलीलातत्त्वभास्करः

प्रारम्भः ।

कर्त्तारं सर्वलोकानां दातारं सुखसंपदाम् ।
हर्त्तारं सर्वविघ्नानां श्रीरामं प्रणमाम्यहम् ॥ १ ॥
यस्याःस्मरणमात्रेण नाशमायान्ति पातकम् ।
सूर्योदयात्तम इव रामलीलां नमामि ताम् ॥ २ ॥

अथ भगवल्लीलाविद्वेषिणां मतं प्रथममुत्थाप्य खण्डयति ॥ पुराणादिविरुद्धत्वादुपहासस्वरूपतः । अशिष्टसंगृहीतत्वाद्धरिलीलां न कारयेत् ॥ ३ ॥ एवं मा वद दुर्बुद्धे यत उक्तियुक्तिका ॥ अयं भावः॥ पुराणादिषु लीलाया विधिदर्शनान्न विरुद्धत्वम् ॥ तथा च रामार्चनचन्द्रिकायां हरिभक्तिविलासे च । आश्विनमासकृत्ये श्रीमदानन्दवनश्रीगोपालभट्टोदाहृतविष्णुधर्मोत्तरवचनानि ॥ आश्विनस्य सितेपक्षे दशम्यां विजयोत्सवे । कर्त्तव्यो वैष्णवैस्सार्द्धं सर्वत्र विजयार्थिभिः॥ रथमारोप्य देवेशं सर्वालंकारभूषितम् । सासितूणधनुर्बाणपाणिं नक्तं च रान्तकम् ॥ स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम् । रथैरश्वैर्गजैःपद्मिः सौमित्रिप्लवगादिभिः ॥ युतं राजोपचारैस्तं शमीं प्रति समानयेत् । शमीवृक्षार्चनं कुर्य इति संक-

स्य पूजयेत् ॥ विष्णुधर्मोक्तमार्गेण यात्रानिर्विघ्नसिद्धये । सीताकान्तं शमीयुक्तं भक्तानामभयंकरम् ॥ अर्चयित्वा शमीवृक्षमर्चयेत् विजयाप्तये । शमी शमयते पापं शमीलोहितकण्टका ॥ धरित्र्यर्जुनबाणानां रामस्य प्रियवादिनी । करिष्यमाणा या यात्रा यथाकालं सुखं मया ॥ तत्र निर्विघ्नकर्त्री त्वं भवित्रा रामपूजिते । गृहीत्वा चाक्षतैः सार्द्धं शमीमूलगतां मृदम् ॥ गीतवादित्रनिर्घोषैस्ततो देवं गृहं नयेत् । कैश्चिद्दृक्षैस्तत्र भाव्यं कैश्चिद्भव्यं च वानरैः ॥ कैश्चिद्रक्तमुखैर्भाव्यं कोशलेन्द्रस्य तुष्टये । निर्जिता राक्षसा दैत्या वैरिणो जगतीतले ॥ रामराज्यं रामराज्यं रामराज्यमिति ब्रुवन् । आनीय स्थापयेत्सुस्थं दिव्यं सिंहासने विभुम् ॥ ततो नीराजय देवेशं प्रणमेद्दण्डवद्भुवि । तेनोपभुक्तं वस्त्रादि धारयेत्स्वजनैः सहेति ॥ ऋक्षादिविर्भाव्यमिति तच्चेष्टादिकमनुसर्तव्यमित्यर्थः॥ हरिभक्तिविलासे—श्रीमद्गोपालभट्टोदाहृतविष्णुयामलवचनेऽपि हरिलीलाविधिः॥ गुरुः परीक्षयेच्छिष्यं संवत्सरमतन्द्रितः । नियमान् विहितान् वर्ज्यान् श्रावयेच्च चतुःशतम् ॥ तत्र विहितानाह ॥ यथा स्वमुद्रारचनं गीतनृत्यादिभक्तितः । शंखादिध्वनिमाङ्गल्य लीलाद्यभिनयो हरेः॥अभिनयो नाटकम् । महाभाष्येऽपि तृतीयाध्यायस्य प्रथमपादे, द्वितीयाऽऽह्निकान्ते ॥ चिरहते च कंसे चिरबद्धे च

बलो । अत्रापि युक्ता कथम् । ये तावदेते शोभिका नाम एते प्रत्यक्षं कंसं घातयन्ति प्रत्यक्षं च बलिं बन्धयन्तीति चित्रेषु कथम् । चित्रेष्वपि उद्गूर्णानि पतिताश्च प्रहारा दृश्यन्ते कंसस्य कृष्णस्य च । ग्रन्थिकेषु कथं यत्र शब्दग्रन्थनमात्रं लक्ष्यते तेऽपि तेषमुत्पत्तिप्रभृत्याविनाशात् तद्बुद्धिं व्याचक्षाणाः सतो बुद्धिविषयान् प्रकाशयन्ति । आतश्च सतो व्यामिश्राश्च दृश्यन्ते केचित् कंसभक्ता भवन्ति केचिद्वासुदेवभक्ताः । वर्णान्यत्वं खल्वपि पुष्यन्ति । केचित्कालमुखा भवन्ति । केचिद्रक्तमुखा त्रैकाल्यं खल्वपि लोके लक्ष्यते । गच्छ हन्यते कंसः । गच्छ घानिष्ये कंसः किं गतेन हतः कंसः । अत्र कैयटः । चिरहते । इति ॥ चिरप्रवृत्तत्वाद्वध्यघातकभावस्य प्रयोजकव्यापाराभावस्य वर्त्तमानत्वासम्भवात्, उपसंख्यानारम्भे तु न दोषः । आख्यानस्य वर्त्तमानत्वादित्यर्थः । शौभिका इति—कंसाद्यनुकारिणां नटानां व्याख्यानोपाध्यायाः कंसानुकारो नटः सामाजिकैः कंसबुद्ध्यागृहीतः कंसो भाष्ये विवक्षितः ग्रन्थिकेष्विति कथकेष्वित्यर्थः । तेपीति तदुक्तं हरिणा ॥ शब्दोपहितरूपांस्तु बुद्धेर्विषयतां गतान् । प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यत इति ॥ शिष्टं भाष्यं स्पष्टम् ॥

उपहासस्वरूपकत्वमपि न धर्ममार्गप्रवर्त्तकत्वात् ॥ तथा च रामतापिन्याम् ॥ धर्ममार्गं चरित्रेण ज्ञानमार्गश्च

नामतः। तथा ध्यानेन वैराग्यमैश्वर्यं यस्य पूजनात्। धर्ममार्गं चरित्रेणेति। श्रीरामस्य चरित्रं दृष्ट्वा अन्येऽपि राजानस्तथा कुर्वन्ति। अशिष्टसंगृहीततत्त्वमपि न॥ यतः शिष्टाः प्रद्युम्नादयः श्रीरामलीलानाटकं कृतवन्तः स्तथा च हरिवंशेऽष्टचत्वारिंशदधिकशततमेऽध्याये, रामायणं महाकाव्यमुद्दिश्य नाटकीकृतम्। जन्म विष्णोरमेयस्य राक्षसेन्द्रवधेप्सया। रोमपादो दशरथ ऋष्यशृंगम्महामुनिम्॥ शान्तार्थमानयामास गणिकाभिः सहानघ। रामलक्ष्मणशत्रुघ्नभरताश्चैव भारत॥ ऋष्यशृंगश्च शान्ता च तथारूपैः नटैः कृताः॥ इत्युक्तमनन्तरम्। रंभाभिसारं कौवेरं नाटकं ननृतुस्ततः॥ शूरो रावणरूपेण रंभा वेषा मनोवती। नलकूबरस्तु प्रद्युम्नः सांबस्तस्य विदूषकः॥ कैलासं रूपितश्चापि मायया यदुनन्दनैः। शापश्च दत्तः क्रुध्यत रावणस्य दुरात्मनः॥ नलकूबरेण च यथा रंभा वाप्यथ सान्त्विता। एतत्प्रकरणं वीरा ननृतुर्यदुनन्दनारिति॥ तवास्मि जानकीनाथ तवास्मि रघुनन्दन। रक्ष मां करुणासिन्धो पाहि मां दीनवत्सल॥

इति श्रीसीतारामीय परमहंसपरिव्राजक हरिहरप्रसादविरचितः श्रीरामलीलातत्त्वभास्करः समाप्तः॥

हरिः ओं श्रीसीतारामार्पणमस्तु॥

इति श्रीअयोध्याशृंगारभवननिवासि वैष्णव पं॰ रामनारायणदासेन संशोधितः श्रीरामलीलातत्त्वभास्करः समाप्तः॥ श्रीरस्तु॥